श्री सुब्रह्मण्य कवच स्तोत्रं

श्री सुब्रह्मण्य कवच स्तोत्रं

अस्य श्रीसुब्रह्मण्यकवचस्तोत्रमहामंत्रस्य, ब्रह्मा ऋषिः, अनुष्टुप्छंदः, श्रीसुब्रह्मण्यो देवता, ॐ नम इति बीजं, भगवत इति शक्तिः, सुब्रह्मण्यायेति कीलकं, श्रीसुब्रह्मण्य प्रसादसिद्ध्यर्थे जपे विनियोगः ||

करन्यासः –
ॐ सां अंगुष्ठाभ्यां नमः |
ॐ सीं तर्जनीभ्यां नमः |
ॐ सूं मध्यमाभ्यां नमः |
ॐ सैं अनामिकाभ्यां नमः |
ॐ सौं कनिष्ठिकाभ्यां नमः |
ॐ सः करतलकरपृष्ठाभ्यां नमः ||
अंगन्यासः –
ॐ सां हृदयाय नमः |
ॐ सीं शिरसे स्वाहा |
ॐ सूं शिखायै वषट् |
ॐ सैं कवचाय हुं |
ॐ सौं नेत्रत्रयाय वौषट् |
ॐ सः अस्त्राय फट् |
भूर्भुवस्सुवरोमिति दिग्बंधः ||

ध्यानं |
सिंदूरारुणमिंदुकांतिवदनं केयूरहारादिभिः
दिव्यैराभरणैर्विभूषिततनुं स्वर्गादिसौख्यप्रदं |
अंभोजाभयशक्तिकुक्कुटधरं रक्तांगरागोज्ज्वलं
सुब्रह्मण्यमुपास्महे प्रणमतां भीतिप्रणाशोद्यतं ||

लमित्यादि पंचपूजा |
ॐ लं पृथिव्यात्मने सुब्रह्मण्याय गंधं समर्पयामि |
ॐ हं आकाशात्मने सुब्रह्मण्याय पुष्पाणि समर्पयामि |
ॐ यं वाय्वात्मने सुब्रह्मण्याय धूपमाघ्रापयामि |
ॐ रं अग्न्यात्मने सुब्रह्मण्याय दीपं दर्शयामि |
ॐ वं अमृतात्मने सुब्रह्मण्याय स्वादन्नं निवेदयामि |

कवचं |
सुब्रह्मण्योऽग्रतः पातु सेनानीः पातु पृष्ठतः |
गुहो मां दक्षिणे पातु वह्निजः पातु वामतः || 1 ||

शिरः पातु महासेनः स्कंदो रक्षेल्ललाटकं |
नेत्रे मे द्वादशाक्षश्च श्रोत्रे रक्षतु विश्वभृत् || 2 ||

मुखं मे षण्मुखः पातु नासिकां शंकरात्मजः |
ओष्ठौ वल्लीपतिः पातु जिह्वां पातु षडाननः || 3 ||

देवसेनापतिर्दंतान् चिबुकं बहुलोद्भवः |
कंठं तारकजित्पातु बाहू द्वादशबाहुकः || 4 ||

हस्तौ शक्तिधरः पातु वक्षः पातु शरोद्भवः |
हृदयं वह्निभूः पातु कुक्षिं पात्वंबिकासुतः || 5 ||

नाभिं शंभुसुतः पातु कटिं पातु हरात्मजः |
ऊरू पातु गजारूढो जानू मे जाह्नवीसुतः || 6 ||

जंघे विशाखो मे पातु पादौ मे शिखिवाहनः |
सर्वाण्यंगानि भूतेशः सर्वधातूंश्च पावकिः || 7 ||

संध्याकाले निशीथिन्यां दिवा प्रातर्जलेऽग्निषु |
दुर्गमे च महारण्ये राजद्वारे महाभये || 8 ||

तुमुले रण्यमध्ये च सर्वदुष्टमृगादिषु |
चोरादिसाध्वसेऽभेद्ये ज्वरादिव्याधिपीडने || 9 ||

दुष्टग्रहादिभीतौ च दुर्निमित्तादिभीषणे |
अस्त्रशस्त्रनिपाते च पातु मां क्रौंचरंध्रकृत् || 10 ||

यः सुब्रह्मण्यकवचं इष्टसिद्धिप्रदं पठेत् |
तस्य तापत्रयं नास्ति सत्यं सत्यं वदाम्यहं || 11 ||

धर्मार्थी लभते धर्ममर्थार्थी चार्थमाप्नुयात् |
कामार्थी लभते कामं मोक्षार्थी मोक्षमाप्नुयात् || 12 ||

यत्र यत्र जपेद्भक्त्या तत्र सन्निहितो गुहः |
पूजाप्रतिष्ठाकाले च जपकाले पठेदिदं || 13 ||

तेषामेव फलावाप्तिः महापातकनाशनं |
यः पठेच्छृणुयाद्भक्त्या नित्यं देवस्य सन्निधौ |
सर्वान्कामानिह प्राप्य सोऽंते स्कंदपुरं व्रजेत् || 14 ||

उत्तरन्यासः ||
करन्यासः –
ॐ सां अंगुष्ठाभ्यां नमः |
ॐ सीं तर्जनीभ्यां नमः |
ॐ सूं मध्यमाभ्यां नमः |
ॐ सैं अनामिकाभ्यां नमः |
ॐ सौं कनिष्ठिकाभ्यां नमः |
ॐ सः करतलकरपृष्ठाभ्यां नमः ||
अंगन्यासः –
ॐ सां हृदयाय नमः |
ॐ सीं शिरसे स्वाहा |
ॐ सूं शिखायै वषट् |
ॐ सैं कवचाय हुं |
ॐ सौं नेत्रत्रयाय वौषट् |
ॐ सः अस्त्राय फट् |
भूर्भुवस्सुवरोमिति दिग्विमोकः ||

इति श्री सुब्रह्मण्य कवच स्तोत्रं |